विलोमगतितयायनभगणम् यदुरीचक्रुः तत्र विरोधादिकं प्रदर्शयिष्यते तद्दृष्ट्वा विद्वद्भिस्तस्य प्रमादोऽप्रमादो वा यगन्तव्यः। तथा हि छायादिना अयनभोगस्य प्रतिवर्षं ५४ विकलाः इदानीं पश्चादयनस्थानचलनं च सर्वज्योतिर्वित्प्रसिद्धम्। तत्र केवलं पश्चाद्गत्याऽयनस्थानचलनेन भचक्रस्य भ्रमणाङ्गीकारे। यदि ५४ विकलाभिः एको वर्षस्तदा १२९६००० विकलात्मकभचक्रभ्रमणे कति वर्षा इत्यनुपातेन २४००० वर्षैस्त्वेको भगणो भवति यदि २४००० वर्षैः एकोभगणः तदा ४३२०००० वर्षात्मके महायुगे कति भगणाभवन्ति इत्यनुपातेन १८० भगणाभवन्ति। ततश्च सौरसोमसिद्धान्तोक्तषट्शतसंख्याविरोधः इदानीं मीननवांशे अयनस्थानविरोधश्च। तथा हि तन्मते राशिचक्रस्य केवलं विलोमगत्यायनभगणस्वीकारेण प्रागुक्तदिशा २४००० वर्षैरेकोभगणः तदा १७२८००० वर्षात्मके कृतयुगे कतीत्यनुपातेन ७२ भगणाः। १२९६००० वर्षात्मकत्रेतायाम् ५४, ८६४००० द्वापरे ३६ इत्येवं त्रियुगे १६२ भगणाः गताः इदानीं कलेः ४९७३ गताब्देषु किमिति जिज्ञासायाम् यदि ५४ विकलाभिरेको वर्षस्तदा ४९७३ वर्षेषु किमित्यनुपाते ७४।३५।४४ अंशाद्ययोगताः इत्यायाति तन्मते च मीनान्तात् सर्वथा पश्चाद्गत्या भगणपूरणस्वीकारेण मीनान्तात् ७४।३५।४४ अंशादितः पूर्व्वमयनस्थानापत्तिः तथाच मीनान्तात् तावद्भिरंशैः पूर्व्वं मकरस्य पञ्चदशांशे अयनांशादि स्यात्। न च तथा प्रत्यक्षादिभिरवगम्यते नापि ज्योतिर्विदां केषाञ्चित्सम्मतम् अतोऽयनस्थानेन केवलविलोमगत्या भचक्रस्य भ्रमणोक्तिः साहसमेव। किञ्च अतिचिरन्तनकालैः संवादनीये प्राग्गतित्वे पश्चाद्गतित्वे वा आर्षं ज्ञानं विना निर्द्धारासम्भवः अतः सौराद्यागमोक्तं प्राग्गतित्वमनादृत्य प्रथमं पश्चाद्गतिस्वीकारः केवलपश्चाद्गतिस्वीकारः अयनचलनस्य तद्भगणसंख्याता विषमकल्पनञ्चार्वागदृशां आगमविरोधात् वचनमात्रेण न श्रद्धाय प्रभवति। किञ्च सौरागमाद्युक्तं प्राग्गतित्वमनादृत्य केवलं पश्चाद्गतित्वं यत् स्वीकृतं तत् सर्व्वव्यवहारलोपकम् तिथ्यादिसाधनाङ्गायनांशादिविलोपकञ्च। एतेन इंलण्डीया अपि ज्योतिर्वैत्तारः सृष्टिकालस्य षट्सहस्रकालमात्रपरिमितिवादिनोऽपि परास्ताः। तैरपि प्रतिवर्षं ५४ विकलाः अयनांशभोगाः स्वीकृताः स्वीकृतश्च षट्षष्टिवर्षैरेकांशभोगः तथा च ६६।८ वर्षादिभिर्यदि एकोऽंशः पश्चाद्गच्छति तदा तदुक्तसृष्टिकाले ६००० कतीत्यनुपाते ९० अंशाः समायान्ति तेन मीनान्तात् ९० अंशान्तरे पश्चाद्गत्या धनुःशेषांशेऽयनारम्भः स्यात् तदेतद्दृष्टविरुद्धत्वादपेक्ष्यमेव मीनान्तं विहाय अन्यत्र क्रान्तिवृत्तारम्भस्थानतश्चलनकल्पने न विनिगमकमस्ति इति विजातीयज्योतिर्विदाम्मतमसङ्गतमेव तैरपि तदवधिक्रान्तिवृत्तारम्भांशचलनस्वीकारात्। इदानीं च संवाद्ययनानुसारेण मीनान्तात् २०।२५।४४ तत्रानुपाते प्रायेण १३७० वर्षा आयान्ति तत्रैव सृष्टिकल्पनन्तु नैव सम्भवति खीष्टाब्द १८७३ कालस्य ततोऽधिकत्वेन तत्पूर्व्वं सृष्टेरुचितत्वात्। पुनर्भगणान्तरस्वीकारे तु २४००० वर्षास्ततोऽधिकाः स्युस्तेन २५३५ वर्षाः सृष्टिकालाः अन्ततः स्युः तावतिथे च काले सर्वग्रहाणां मेषादौ स्थित्यसम्भव एव इति सर्वथा तन्मतमनादरणीयमेव। प्राग्दर्शितसरणौ प्राचीनसम्मतिरपि यथा। “मृगसंक्रान्तितः पूर्व्वं पश्चात्तारादिनान्तरे। प्रतिवर्षं चतुः पञ्चपलमानक्रमेण तु। षट्षष्टिवत्सरानेकदिनं स्यादयनं रवेः। एवं चतुःपञ्चदिनादयनारम्भणं क्रमात्। व्युत्क्रमेण च तद्वत् स्यादुदगयानं रवेर्ध्रुवम्। कर्किसंक्रमणे तद्वदभितोदक्षिणायनम्। अयनांशक्रमेणैव विषुवारम्भणं तथा। रविसंक्रान्तितोमेषतुलयोरभितः पुनः” तिथि०त०। अधिकमयनसंक्रान्तिशब्दे वक्ष्यते। एति सूर्य्योदक्षिणामुत्तरां वाऽत्र आधारे ल्युट्। पूर्व्वोक्तरीत्या सूर्यस्योत्तरदक्षिणागत्याधारे ११ काले तथा च। “तपस्तपस्यौ शिशिरावृतुः मधुश्च माधवश्च वासन्तिकावृतुः शुक्रश्च शुचिश्च ग्रीष्मावृतुः अथैतदुत्तरायणं देवानां दिनं नभश्च नभस्यश्च वार्षिकावृतुः इषश्च ऊर्जश्च शारदावृतुः सहाश्च सहस्यश्च हैमन्तिकावृतुः अथैतद्दक्षिणायनं देवानां रात्रिः” इति श्रुतौ “अग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणम् तत्र प्रयाता गच्छन्ति ब्रह्म ब्रह्मविदोजनाः। धूमोरात्रिस्तथा कृष्णः षण्मासादक्षिणायनमिति” गीतायाञ्च षण्मासानामेव अयनत्वेनाभिधानात्। १२ अयनाभिमानिदेवेषु “आतिवाहिकास्तल्लिङ्गात्” शा०सू०। अर्च्चिरादीनां तदभिमानदेवतापरत्वव्यवस्थापनात् “तेऽर्चिषमभिसम्पद्यन्ते अर्च्चिषोऽहः अह्न आपूर्य्यमाणपक्षम् आपूर्य्यमाणपक्षात् यान्षुदङ्ङेति तान्मासान् मासेभ्यः संवत्सरमित्युपक्रम्य सएतान् ब्रह्म गमयतीति” छा०उ० श्रुतौ ब्रह्मगमयितृत्वोक्तेः तेषां चेतनपरत्वौचित्यम्। “अयते याति अनेन ऋतुत्रयेण सूर्य्योदक्षिणामुत्तरां वेति